त्रिंशाः” शतपथब्राह्मणे १३।५।४।२०। अध्यायादि।

**त्रिणाचिकेत** पु० त्रिःकृत्वश्चितो नाचिकेतोऽग्निर्येन पृषो० संज्ञात्वात् णत्वम्। अध्वर्य्युभेदे “छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिणाचिकेताः” इति श्रुतिः “त्रिणाचिकेतः पञ्चाग्निस्त्रिसुपर्णः षडङ्गवित्” मनुः।

**त्रित** पु० १४६६।६७ पृ० एकतशब्दोक्ते आप्त्ये १देवभेदे ब्रह्मणो मानसपुत्ररूपे २ऋषिभेदे च त्रिषु क्षित्यादिस्थानेषु तायमानः ताय—ड। त्रिषु विस्तीर्णतमे ३प्रख्यातकीर्त्तौ च त्रि०।“यस्य त्रितो व्योजसा वृत्रं विपर्वमर्द्दयत्” ऋ० १। १८७।१। [तक्ष्णां त्रितये। क्लीवत्वे वा ङीप्।

**त्रितक्ष** न० स्त्री त्रयाणां तक्ष्णां समाहरः अच् समा०

**त्रितय** न०स्त्री त्रयाणामवयवः त्रयोऽवयवा येषाम् वा तयप्॥ त्रयशब्दार्थे १त्रित्वसंख्यायाम् “ब्रह्महत्याव्रतं वापि वत्सरत्रितयं चरेत्” याज्ञ० “उद्धूतलोकत्रितयेन साम्प्रतम्” माघः। “वरमाप स दिष्टपिष्टपत्रितयानन्यसदृग्गुणोदयाम्” नैष०। स्त्रियां ङीप्। २तत्संख्यान्विते त्रि०। “पतिश्वशुरता ज्येष्ठे पतिदेवरतानुजे। इतरेषु च पाञ्चाल्याः त्रितयं त्रितयं त्रिषु” उद्भटः। “त्रितयं ज्ञानमयेन चक्षुषा” रघुः। “प्रणवव्याहृतिभ्यां च गायत्र्या त्रितयेन च। उपास्यं परमं ब्रह्म आत्मा यत्र प्रतिष्ठितः” यो०याज्ञ०।[धिभौतिकाधिदैविकरूपे दुःखत्रये।

**त्रिताप** न० त्रयाणां तापानां समाहारः। आध्यात्मिका-

**त्रिदण्ड** न० त्रयाणां दण्डानां समाहारः। १चतुरङ्गुलगोबालवेष्टनादन्योन्यसंबद्धे यतेर्दण्डत्रये। २वाङ्मनःकायदण्डत्रये च। तदस्यास्तीति अच्। ३संन्यासाश्रमे पु०। त्रिदण्डिशब्दे दृश्यम्। “यस्त्वसंहृतषड्वर्गः प्रचण्डेन्द्रियसारथिः। ज्ञानवैराग्यरहितस्त्रिदण्डमुपजीवति” भाग०

**त्रिदण्डिन्** पु० त्रिदण्डमस्त्यस्य इनि। सन्न्यासाश्रमे। “वाग्दण्डोऽथ मनोदण्डः कायदण्डस्तथैव च। यस्यैते निहिता बुद्धौ त्रिदण्डीति स उच्यते। त्रिदण्डमेतन्निक्षिप्य सर्वभूतेषु मानवः। कामक्रोधौ तु संयम्य ततः सिद्धिं नियच्छति” मनुः। “त्रिदण्डग्रहणादेव प्रेतत्वं नैव जायते। अहन्येकादशे प्राप्ते पार्वणन्तु विधीयते” लिखि०सं० तस्यापि पार्वणं श्राद्धं विहितम्।

**त्रिदला** स्त्री त्रीणि त्रीणि दलानि प्रतिपत्रं यस्याः। (गोजालिया) १गोधापदीलतायाम् जटा०।२विल्ववृक्षे पु०।

**त्रिदलिका** स्त्री त्रीणि दलानि प्रतिपत्रेऽस्याः कप् कापि अत इत्त्वम्। चर्म्मकषालतायां शब्दच०।

**त्रिदश** पु० तिस्रो दशा जन्मसत्ताविनाशाख्या न तु वृद्धिपरिणामक्षया मर्त्यानामिव यस्य, त्रीन् तापान् दशति वा दश—घञर्थे संज्ञायां कर्त्तरि को वा। १देवे अमरः। अथ वा त्र्यधिकास्त्रिराहत्ताश्च दश परिमाणमेषां डच् समा० शाक० अधिकाहत्तशब्दलोपः एकस्यैव त्रिशब्दस्य तन्त्रतयोच्चारणात् उभयार्थपरत्वम्। त्रयस्त्रिंशन्मुख्यगणवत्सु २देवेषु अयमेव पक्षः श्रुत्यनुगुणः त्री च दश चेति छान्दोग्येऽभिहितत्वात् त्र्यधिकाहत्तपरताद्योतनार्थं त्री चेति द्विवचनान्ततया निर्द्देशः। ते च देवाः “अर्का द्वादश, रुद्रा एकादश, वसवोऽष्टौ, अश्विनौ द्वाविति। अश्विनीकुमारौ विहाय इन्द्रः प्रजापतिश्चेति वा द्वाभ्यां पक्षान्तरे संख्यापूरणं त्रयस्त्रिंशत्पतिशब्दे मूलं दृश्यम् “तस्मिन् मघोनस्त्रिदशान् विहाय” कुमा०। “त्रिदशैर्दिशे नमः” माघः। तिस्रो दशा जाग्रदाद्यवस्था यस्य। २जीवे त्रिदशाध्यक्षशब्दे दृश्यम्।

**त्रिदशगुरु** पु०६त०। वृहस्पतौ। “धूमाभेऽनावृष्टिस्त्रिदशगुरौ न्नृपवधो दिवा दृष्टे” वृ० स० ८ अ०।

**त्रिदशगोप** पु० त्रिदशो देवभेद इन्द्रः गोपो रक्षकोऽस्य तस्य वर्षाभवत्वात्। इन्द्रगोपकीटे “अदृश्य त्रिदशगोपमात्रके” रघुः। [र्घ्याद्योऽप्यत्र।

**त्रिदशदीर्घिका** स्त्री ६त०। गङ्गायां हेमच०। त्रिदशवा-

**त्रिदशपति** पु० ६त०। इन्द्रे त्रिदशेश्वराद्योऽप्यत्र।

**त्रिदशमञ्जरी** स्त्री त्रिदशप्रिया मञ्जरी यस्य संज्ञात्वात् न कप्। तुलस्याम् राजनि०।

**त्रिदशबधू** स्त्री ६त०। अप्सरःसु त्रिदशवनिताद्योऽप्यत्र “कैलासस्य त्रिदशवनितादर्पणस्यातिथिः स्याः” मेघ०।

**त्रिदशवर्त्मन्** न०६त०। नभसि शब्दार्थचि०। [नैष०पारस्करः

**त्रिदशसर्षप** पु० त्रिदशप्रियः सर्षपः। १देवसर्षपे सर्षपभेदे

**त्रिदशाङ्कुश** पु० ६त० वज्रे शब्दार्थचिन्तामणिः।

**त्रिदशाचार्य्य** पु० ६त०। वृहस्पतौ हलायु०।

**त्रिदशाधिप** पु० ६त०। शक्रे।

**त्रिदशाध्यक्ष** पु० विष्णौ “त्रिपदस्त्रिदशाध्यक्षः” विष्णुस०। अस्य व्युत्पत्तिर्भाष्ये दर्शिता यथा “गुणावेशेन संजातास्तिस्रो दशा अवस्थाजाग्रदादयस्तासामध्यक्ष इति त्रिदशाध्यक्षः। त्रिदशानां वाऽध्यक्षः स्वामी”।

**त्रिदशायन** पु० त्रिदशानामयनं यत्र। विष्णौ “नारायणायात्मभवायनाय लोकायनाय त्रिदशायनाय” हरिवं १५४अ०।

**त्रिदशायुध** न० ६त०। १वज्रे त्रिकाण्ड०। २इन्द्रधनुषि च।